क्र. नं. १०७

संस्कृत

# राजवाडे

याज्ञिक

अंक ८४२ शाखा

ग्रंथनाम प्रयोगरत्न — पृ. ६६ ते १६८ अपूर्ण.

ग्रंथकार

काल पृष्ठ

स्थल

३७९५

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

ष्टमशुभं शय्यादौशुभं इत्यादि ज्ञेयं दुष्टमासादौ प्रथमरजोदर्शने तांबूलभक्षणादिमंग
ळाचारं न कुर्यात् द्वितीये तु शुभे तत्र कुर्यादिति केचित् प्रथमे दुष्टे रजोदर्शने द्वितीयं प्रती
क्ष्य तस्मिन्नप्यशुभे विस्तरेण शांतिं कुर्यात् इत्यपि केचित् प्रथम एव यथाशक्ति शांतिं च
रेदित्यपरे अत्रैकस्मिन्नप्यशुभे वक्ष्यमाणां शांतिं कार्या द्वित्राद्यशुभसन्निपाते तु तत्सू
चितबहुशुभ निरासनार्थं वक्ष्यमाणा संख्याक्रमविवृद्ध्या कार्या यथाशक्तीत्यादि ज्ञे
यं इति शुभाशुभविचारः अथ शांतिरुच्यते तत्र एनं विनायकं पूज्य ग्रहांश्चैव विधा
नतः कर्मणां फलमाप्नोतीति याज्ञवल्क्येन कर्मफलसिद्धौ अविघ्नार्थत्वेन ग्रहयज्ञस्या
नावश्यकत्वोक्तेरिह च शौनकेन आर्त्तवानां तु नारीणां शांतिं वक्ष्यामि शौनक इत्युप
क्रम्य ग्रहातिथ्यपुरःसरमिति प्रकरणोक्तेरावश्यकत्वादेकदेशकालकर्तृकाणां च

(२)

प्र०रज ६६

विशेषवचनाभावे तंत्रेण कर्त्तव्यत्वाद्ग्रहमखपूर्वकस्तंत्रेण शांतिकप्रयोग उच्यते रजोद
र्शनानंतरं पंचमादिदिने चंद्रताराद्यानुकूल्ये शुचिदेशे सुस्नातया पत्न्या सुतः पतिः प्राङ्मु
ख उपविश्य प्राणानायम्य देशकालौ स्मृत्वा मम पत्न्याः प्रथमरजोदर्शनेऽमुकदुष्टमा
सादिसकलारिष्टनिरासद्वारा श्रीपरमेश्वरप्रीत्यर्थं सग्रहमखां शौनकोक्तां शांतिं करि
ष्ये इति संकल्प्य गणेशपूजनपुण्याहवाचनगौर्यादिषोडशमातृकापूजनब्राह्म्यादि
सप्तमातृकापूजननांदीश्राद्धानि कृत्वा शांतदांतकुटुंबिनं मंत्रतंत्रज्ञमाचार्यं ब्राह्मणं
च जपहोमार्थमष्टौ षट् चतुरो वा ऋत्विजो पि वृत्वा गंधादिना पूजयेत् ततः आचार्यो
ग्रहेशानदेशे स्थुचौ महीद्यौरिति भूमिं स्पृष्ट्वा तद्दक्षिणोत्तरतश्च स्पृष्टदेशेषु मंत्रावृत्त्या रा
शित्रयं कृत्वा तेनैव क्रमेण राशित्रयेण नवमकालमस्तं कुंभत्रयमाकृलेषिति मंत्रा ६६

तद्दक्षिणोत्तरतश्च तथैव भूमिं स्पृष्ट्वा ॐ षधयः सामिति द्रोणन्प्रमाणं व्रीहिभिर्मध्ये

(2A)

कृत्वास्थापयेत् एवंसर्वत्रमंत्रावृत्तिः ततः प्रसुवआपइतिनवर्चस्यसूक्तस्य सिंधुक्षित्मै
यमेधोनद्योजगती कलशोदकपूरणेविनियोगः प्रसुवआपइतिसूक्तंनवर्चं याःप्रव
तइत्यस्यवसिष्ठोनद्यःशक्करी विनियोगःप्राग्वत् एवमग्रेपि तत्रतत्रविनियोगो[illegible]ज्ञे
यः गंधद्वारामितित्रिष्वपिगंधंप्रक्षिप्य याओषधीरितिसर्वौषधीस्त्रिषु ओषधयःस
मितियवान्प्रक्षिपेत् ततोमध्यकुंभेयवव्रीहितिलमाषप्रियंगुश्यामाकमुद्गान्क्षिप्त्वा
गायत्र्योडुंबरःकुशाद्दूर्वारक्तोत्पलचंपकाबिल्वविष्णुक्रांतातुलसीबर्हिशिखपुष्पीशताव
र्यश्वगंधानिर्गुंडीरक्तपीतसर्षपामार्गपलाशापनसजीरकप्रियंगुगोधूमव्रीहयश्चछर
षिदुग्धघृतपद्मपत्रनीलोत्पलसितरक्तपीतकुरंटकगुंजावचाभद्रकेमुस्ताकाख्यानि
द्वात्रिंशदोषधानिसर्वाणियथासंभवंवाक्षिपेत् ततस्त्रिषुकलशेषु कांडात्कांडादि

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3)

प्र०रत्न तिदूर्वा अश्वत्थेवइतिपंचपल्लवान् गजाश्वस्थानरथ्यावल्मीकसंगमह्रदगोष्ठस्थामृदः
६७ स्योनापृथिवीतिक्षिप्त्वा याःफलिनीरितिपूगफलानिसहिरण्यानीति कनककुलिश
नीलपद्मरागमौक्तिकानिपंचरत्नानि हिरण्यरूपइतिहिरण्यंक्षिपेत् युवासुवासाइ
तिसूत्रेणवाससाचकलशकंठान्वेष्टयित्वा गंधाक्षतपुष्पमालादिभिःकलशान्भूष
येत् ततःकलशत्रयोपरितेनैवक्रमेण सौवर्णंराजतंकांस्यमयंताम्रमयंवैणवंमृन्मयं
वायवादिपूरितंपात्रत्रयंपूर्णादर्वीतिनिधायतदुपरिश्वेतंवस्त्रत्रयंन्यस्यतत्रचंदना
दिनाष्टदलानिकुर्यात् तत्रमध्ये गायत्र्यागाथिनोविश्वामित्रोभुवनेश्वरीगायत्री
भुवनेश्वर्यावाहनेविनियोगः ॐतत्सवितुर्वं० भुवनेश्वरीमावाहयामि यथाशक्तिसु ६७
वर्णनिर्मितांभुवनेश्वरीप्रतिमांअग्न्युत्तारणपूर्वंस्थापयेत् तद्दक्षिणकुंभोपरिवस्त्रे

(3A)

इंद्राणीमासुवृषाकपिरिंद्राणीपंक्तिः इंद्राण्यावाहने० इंद्राणीमासु० इंद्राणीमावाहयामी
तितथैवसौवर्णीमिंद्राणीप्रतिमांसंस्थाप्य ततः उत्तरकलशोपरि इंद्रत्वाविश्वामित्रइं
द्रोगायत्री इंद्रावाहने० ॐइंद्रत्वावृषभंवयंसुतेसोमेहवामहे सपाहिमध्वोअंधसः
इंद्रमावाहयामीतिसौवर्णीमिंद्रप्रतिमांस्थापयेत् ततः उक्तमंत्रैरुक्तक्रमेणदेवतात्र
यस्वकांडाद्युसमयेनषोडशोपचारपूजांकुर्यात् ततोमध्येआचार्योष्टसहस्रमष्टशतं
वागायत्रींजप्त्वा श्रीसूक्तंजपेत् हिरण्यवर्णामितिपंचदशर्चस्यसूक्तस्य आनंदकर्द
मश्चिक्लीतेंदिरासुताऋषयः श्रीर्देवता आद्यानांतिसृणामनुष्टुप् चतुर्थमंत्रस्यबृ
हती पंचमषष्ठयोस्त्रिष्टुप् सप्तमादिचतुर्दशपर्यंतानामनुष्टुप् अंत्याप्रस्तारपंक्तिः
जपेविनियोगः हिरण्यवर्णामितिपंचदशऋचान्पाठित्वा ततः एकोऋत्विक्दक्षि

Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(४)

प्र०रत्न णाकुंभेरुद्रसूक्तानिजपेत् तथा कद्रुद्रायेतिनर्चस्यसूक्तस्यघोरःकण्वोरुद्रोगायत्री इ
६८ मारुद्रायतवसइत्येकादशर्चस्यकुत्सोरुद्रआद्याजगत्यंत्येद्वेत्रिष्टुभौ आतेपितरिति
पंचदशर्चस्यगृत्समदोरुद्रस्त्रिष्टुप् इमारुद्रायस्थिरधन्वनइतिचतसृणांवसिष्ठोरु
द्रस्तिस्रोजगत्योंत्यात्रिष्टुप् आवोराजानंवामदेवोरुद्रस्त्रिष्टुप् तमुष्टुभोमोत्रीरुद्र
स्त्रिष्टुप् भुवनस्यपितरमृजिश्वारुद्रस्त्रिष्टुप् त्र्यंबकंवसिष्ठोरुद्रोनुष्टुप् जपेविनियो
गः अथान्योक्तस्त्रिगुणरकुंभेएकादशावृत्तिभीरुद्रंजपेत् तत्रादौन्यासान्कृत्वाऋ
ष्यादिस्मरेत् यथा नमकानांप्रथमानुवाकआद्यायाःकश्यपोद्वितीयायात्रेयस्तृती
यायाःकश्यपस्ततोद्वयोर्गौतमस्ततएकस्याःकण्वःततोद्वयोर्मरुत्वांस्ततएकस्यभग ६८
वांस्ततस्तिसृणांनारदस्ततस्तिसृणांभगवान् द्वितीयानुवाकस्यमंडूकस्तृतीयानु

(4A)

वाकस्यभगवान्चतुर्थानुवाकस्यदुर्वासाःपंचमषष्ठानुवाकयोर्भगवान्सप्तमानुवाकस्य
हेमकोशोऽष्टमानुवाकस्यनवमानुवाकेचनमोवइतियावद्भगवान् अवशिष्टस्याग्निर्दश
मानुवाकेप्रथमस्यपुलहोद्वितीयस्यस्कंदस्ततोद्वयोर्मांडव्यस्ततएकस्यदेवराट्ततएक
स्यभगवान्ततएकस्यात्रिस्ततएकस्यवैयाघ्रस्ततएकस्यभगवांस्ततएकस्यवैराजस्त
तएकस्यपुलहस्ततएकस्यनारदः ततएकादशानुवाके आद्यानांचतुर्णांदुर्वासास्ततआ
समाप्तिदेवलइत्यृषयः प्रथमानुवाकेआद्यस्यरुद्रस्ततएकस्यशंभुस्ततएकस्यस्कंदात्मा
रुद्रस्ततोद्वयोरुद्रस्ततएकस्यशंभुस्ततोद्वयोरादित्यात्मारुद्रस्ततएकस्यशंभुस्ततस्तिसृ
णांरुद्रःततस्तिसृणांभगवान् ततोद्वितीयतृतीयानुवाकयोरुद्रश्चतुर्थपंचमषष्ठानु
वाकानांशंभुःसप्तमानुवाकस्यनमोवःकिरिकेभ्यइत्यंतस्यचनवमस्यभगवानवशिष्ट

(5)

प्र०रत्न ६७

स्यरुद्रोदृशमानुवाकेचतुर्णांरुद्रस्ततएकस्यनंदीश्वरात्मारुद्रस्ततएकस्यभगवांस्ततएकस्य
शंभुस्ततएकस्यरुद्रस्ततएकस्यभगवांस्ततोद्वयोः शंभुस्ततोवशिष्टानांरुद्रइतिदेवताः प्र
थमानुवाकेआद्येनुष्टुभौततएकस्वराडनुष्टुप् ततएकानिचृदनुष्टुप् ततएकानुष्टुप् ततए
कानिचृदनुष्टुप् ततएकाप्रस्तारपंक्तिः सर्वीततएकानुष्टुप् ततश्चतस्रोजगत्यः ततस्तिस्रस्त्रि
ष्टुभस्ततएकापंचपदात्रिष्टुप् महाबृहतीवा ततोद्वादशानुष्टुभस्ततस्त्रीणियजूंषित
तस्तिस्रोनुष्टुभस्ततएकंयजुरितिछंदांसि अथचमकानामग्निः कांडऋषिः आद्याअग्ना
वैष्णवीगायत्री शिष्टानांचाजाभिद्वयोन्नादिविशेषादेवताः यजुःजपेविनियोगः एवंजप्त्वा
शंनइंद्राग्नीइतिसूक्तंजपेत् शंनइंद्राग्नीइतिपंचदशर्चस्यसूक्तस्यवसिष्ठोविश्वेदेवा ६७
स्त्रिष्टुप् जपेवि० ततः पश्चिमदेशेस्थंडिलेग्निंप्रणीयतदीशान्यांवेद्यादौनवग्रहांदीस्तत्र

Rajwade Sanshodhan Mandal, Dhule and ... Yashwantrao Chavan ... Mumbai.

(5A)

न्मंत्रैरावाह्य षोडशोपचारैः संपूज्य तदीशान्यां प्राग्वत्कुंभं संस्थाप्य तत्र वरुणमावाह्याग्निस
मीपेन्वाधानं कुर्यात् तथा द्वे समिधावाधाय देवतापरिग्रहार्थमन्वाधानं करिष्ये अस्मिन्न
न्वाहिते ग्नावित्यादि चक्षुषी आज्येनेत्यंतमुक्त्वा नवग्रहान्प्रत्येकममुकसंख्याभिः समित्ति
लाज्याहुतिभिर्भुवनेश्वरीममुकसंख्याभिर्दूर्वातिलमिश्रगोधूमपायसाज्याहुतिभिः इंद्रा
णीमिंद्रं च प्रत्येकममुकसंख्याभिः दूर्वातिलमिश्रगोधूमपायसाज्याहुतिभिरित्युक्त्वा शेषेण
स्विष्टकृतमित्यादि संस्रावयक्ष्ये इत्युक्त्वाज्यं कुर्यात् अन्ये तु गायत्र्यैव तु होतव्यं हविश्चतुष्टयं
ततः स्विष्टकृतं कृत्वेति शौनकेनेंद्राणींद्रयोरुक्तमानभिधानात्तयोर्होमो नास्तीत्याहुः तन्मते
न्वाधानादौ तत्कीर्तनाभावः आहुतिसंख्या वक्ष्यते ततः परिस्तरणादि पूर्णपात्रनिधानां
तं कृत्वा भुवनेश्वरींद्राणींद्रेभ्योः मुष्मै त्वेति चतुरो मुष्टीन्निरूप्याहुतिभिः कृत्वाज्यानुरूप्य गो

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(6)

ग्र॰रत्न दुग्धपायसं श्रपयित्वाऽज्यसंस्काराद्याज्यभागांतं कुर्यात् ततो यजमानो दक्षिणतउपविश्य
७० होमार्थं वजपार्थं च वरयेदृत्विजो बहून् आचार्योद्विजैः सहेति चोक्ते राचार्यो ऋत्विजां होमा
वगमात्तेषां वा स्वत्वेन त्यागायोगात्तैश्च क्रियमाणे होमे यजमानेन श्रत्याकृतिस्त्यागस्याश
क्यत्वात्तदानीमेवांगप्रधानदेवताभ्य[illegible]यएताभ्य इदं न ममेति त्यजेत् ततः आचार्यः सऋ
त्विंनवग्रहेभ्यो ष्टशताष्टा[illegible] विंशत्यष्टान्यतमसंख्याकाघृताक्ता अर्कादिसमिधस्तिला
श्च क्रमीर्हुत्वा अधिदेवताप्रधानदेवताप्रत्यधिदेवताविनायकादिपंचलोकपालेभ्यस्तन्न्यून
संख्ययाजुहुयात् एभ्यस्तकपालाश्चः समिधः ग्रहाणां यदाष्टोत्तरशतं तदान्येभ्यश्च तस्र इति संप्र
दायः ततोऽभ्युदयेश्वर्यैर्गायत्र्या दधिमधुघृताक्ताभिस्तिस्रभिर्दूर्वाभिरेकाकृतिरित्येवम
ष्ट सहस्रमष्टशतं वा दूर्वाकृतीर्घृताक्ततिलमिश्रगोधूमाकृतीः पायसाकृतीर्घृताकृतीश्च ७०

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(6A)

जुहुयात् एवमिंद्राणींद्रयोःप्रागुक्तमंत्राभ्यांक्रमेणहविश्चतुष्टयंप्रत्येकमष्टशतसंख्यंभु
वनेश्वर्याअष्टसहस्रपक्षेजुहुयात् तस्याअष्टशतपक्षेतुतयोरष्टाविंशतिःसंप्रदायः प
क्षेतुतयोर्नहोमः ततःस्विष्टकृतादिप्रायश्चित्तहोमांतंकृत्वा इंद्रादिदिक्पालेभ्योनवग्रहेभ्यो
भुवनेश्वरींद्राणींद्रेभ्यःक्षेत्रपालायचसदीपान्माषभक्तबलींस्तत्तन्मंत्रैर्दत्वापूर्णाहुतिंजु
हुयात् समुद्रादूर्मिरित्येकादशर्चस्यसूक्तस्यवामदेवआपस्त्रिष्टुप् अंत्याजगती पू
र्णाहुतिहोमेवि० ततःप्रणीताविमोकंकृत्वा भुवनेश्वर्यादिकलशोदकंनवग्रहकलशो
दकंचपात्रांतरेगृहीत्वातेनसहपंचपल्लवैःसकुशदूर्वैर्धृतनववस्त्रंयजमानंधृतनवव
स्त्रकंचुकींचतद्भार्यांऋतुमतींचसर्त्विगुदङ्मुखआचार्योभिषिंचेदेतैर्मंत्रैः तेच
आपोहिष्ठेतिनवर्चस्यांबरीषःसिंधुद्वीपआपोगायत्री पंचमीवर्धमानासप्तमीप्रतिष्ठा

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

ऋ०स्न अंत्येद्वेअनुष्टुभौ अभिषेकेवि० यएकइद्धिदयतइतिगोतमोराहूगणइंद्रउष्णिक् त्रिभिष्टुं
७१ देवेतिसप्तर्चस्यसूक्तस्यवसिष्ठआद्यानांत्रयाणामग्निस्ततश्चतुर्णांविश्वेदेवाआद्यागाय
त्रीद्वितीयानुष्टुप्ततस्तिस्त्रोगायत्र्योंत्येद्वेअनुष्टुभौ उभयंशृणवच्चनइतिगर्भइंद्रोबृहती
स्वस्तिदाविशोयमींद्रोनुष्टुप् त्र्यंबकंवसिष्ठोरुद्रोनुष्टुप् जातवेदसेमारीचःकश्यपोदुर्गा
त्रिष्टुप् समुद्रज्येष्ठाइतिचतसृणांवसिष्ठआपस्त्रिष्टुप् त्रायंतामितितिसृणांसप्तर्षयआ
पोनुष्टुप् इमाआपइतितिसृणांसप्तर्षयआपोनुष्टुप् देवस्यत्वेत्यापस्तंबशाखागतैस्त्रि
भिर्मंत्रैः तमीशानंगोतमईशानोजगती। त्वमग्नेरुद्रइत्यापस्तंबशाखागतेनैकेन तमुष्टु
हीत्यांगिरसस्तिरश्चीरुद्रास्त्रिष्टुप् भुवनस्यपितरमृजिश्वारुद्रस्त्रिष्टुप् यातेरुद्रेतिकश्य ७१
पोरुद्रस्वराडनुष्टुप् यज्जाग्रतइतिषण्णांशिवसंकल्पमंत्राणांप्रजापतिर्मनस्त्रिष्टुप्

(TA)

यजुषाप्लुते इंद्रत्वा वृषभंवयमितिपंचानांविश्वामित्रइंद्रोगायत्री ततःसुरास्त्वामभिषिंचं
त्विति नवभिःपौराणोक्तैर्मंत्रैःपूर्वोक्तैरभिषिंचेत् ततःकलशोदकेनान्येनचोदकेनसुस्ना
तोदंपतीशुक्लवासोगंधमाल्यादिधृत्वोपविशेतां तत्रपत्नीदक्षिणतः ततोयजमानोग्निं
संपूज्यविभूतिंधृत्वाऽचार्यादीन्गंधपुष्पवस्त्रालंकारादिभिर्यथाशक्तिपूजयित्वाऽचा
र्यायधेनुंदक्षिणांदद्यात् दक्षिणाविचारस्त्वानदक्षिणांनंतरं अनवस्थाप्रसंगात् ततोब्र
ह्मणे यथाशक्तिदक्षिणांदत्वा रुद्रजापिनेसदक्षिणमनड्वाहंदक्षिणांदद्यात् तत्रधेनुंन्या
येनादक्षिणत्वेप्राप्तेसदक्षिणमनड्वाहंप्रदद्यात् रुद्रजापिनेइतिप्रसवकरणात्सदक्षिण
त्वांततोन्येभ्यऋत्विग्भ्योन्येभ्यश्चब्राह्मणेभ्योभूयसींदक्षिणांदद्यात् ततोग्रहपीठदेवतां
भुवनेश्वर्यादीनांचोत्तरपूजांपंचोपचारैःकृत्वाक्षमाप्य यांतुदेवगणाइतिविसृज्याचा

(४)

ग्रं०रत्न यीयहस्तेप्रतिपद्याग्निंसंपूज्य गच्छगच्छसुरश्रेष्ठेतिविसर्जयेत् ततोब्राह्मणामहच्छांतिंपठे
७२ युः सायथा आनोभद्राइतिदशानांगोतमोराहूगणोविश्वेदेवाआद्याःपंचजगत्यःषष्ठीवि
राट् सप्तमीजगतीततस्तिस्रस्त्रिष्टुभः स्वस्तिनोमिमीतामितिपंचानांस्वस्त्यात्रेयोविश्वे
देवाआद्यास्तिस्रस्त्रिष्टुभस्ततोनुष्टुभौ शंनइंद्राग्नीइतिपंचदशानांवसिष्ठोविश्वेदेवास्त्रि
ष्टुप् त्यमूष्वितितिसृणांतार्क्ष्योरिष्टनेमिस्तार्क्ष्यस्त्रिष्टुप् तच्छंयोःशंयुर्विश्वेदेवाःशक्करी स
र्वेषांशांतिपाठजपेविं० ततोयजमानोनवग्रहप्रीत्यर्थंत्रीन्भुवनेश्वरींद्राणींद्रप्रीतयेच
प्रत्येकंत्रीस्त्रीन्ब्राह्मणान्भोजयित्वा संकल्प्यवा विप्राशिषोगृहीत्वासुहृद्युतोभुंजीत
एवंकृतेसर्वारिष्टशांतिर्भवति ततःशुभकालेगर्भाधानंकुर्यात् इतिदुष्टरजोदर्शनशां ७२
तिः अथचंद्रसूर्योपरागकालेप्रथमरजोदर्शनेशांतिविशेषउच्यते सचोपरागस्य

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(8A)

पौर्णमास्यमावास्याभ्यामविनाभावान्नदतिरिक्तवादौरौद्रेप्रागुक्तशांत्यासमुच्चीयते निमि
त्तभेदात् अदृष्टार्थत्वाच्चप्रत्यक्षविध्यभावेतत्कार्यकारयित्वानवगमनामनहोमैर्नारिष्ट
होमानामिवानयातान्निवृत्त्ययोगात् ग्रहणमात्रेत्वियमेव अत्रचपुनःश्रवणाभावान्नवग्रह
मखः कृताकृतइतिविवेकः तत्रकेवलायाः प्रयोगः पूर्वोक्तकालेसपत्नीकः शुचिःप्राङ्मुखउ
पविश्यप्राणानायम्यदेशकालौस्मृत्वाममपत्न्याःचंद्रोपरागेप्रथमरजोदर्शनसूचितारिष्टनि
रासद्वाराश्रीपरमेश्वरप्रीत्यर्थंशांतिंकरिष्ये इति संकल्प्य प्राग्वदृत्विक्पूजां कुर्यात् नवग्र
हपक्षेसनवग्रहामितिसूर्योपरागेप्रथमेत्यादिवदेत् ततःआचार्यःशुचिदेशेगोपयेनोपलि
प्यततःपंचवर्णरजोभिरष्टदलपद्मंकृत्वा तदुपरिनवंश्वेतंवस्त्रंउदक्दशंसंस्थाप्ययथोक्तर
जतनिर्मितांचंद्रप्रतिमां आप्यायस्वराहूगणोगोतमःसोमोगायत्री चंद्रावाहनेविनियोगः

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(९)

ग्र०रत्न ॐआप्यायस्वस० चंद्रमावाहयामीतिस्थापयेत् सूर्यग्रहेतुयथाशक्तिसुवर्णनिर्मितांसूर्य
७२ प्रतिमां आकृष्णेनांगिरसोहिरण्यस्तूपःसविताञिष्टुप् सूर्यावाहने० ॐआकृष्णेनरजसा०
सूर्यमावाहयामीतिस्थापयेत् ततोयथाशक्तिसीसनिर्मितांराहुप्रतिमां स्वर्भानोरत्रिरा
हुस्त्रिष्टुप् राह्वाहनेविनि० ॐस्वर्भानोरधयदिंद्रमायाअवोदिवोवर्तमानाअवाहन् गूळ्हं
सूर्यंतमसापव्रतेनतुरीयेणब्रह्मणाविंददत्रिः राहुमावाहयामीतितदुत्तरस्थापयेत् ततो
यस्मिन्नक्षत्रेग्रहणंतन्नक्षत्रदेवताप्रतिमां यथाशक्तिसुवर्णनिर्मितांतत्तन्मंत्रैर्नाममंत्रैर्वा
ॐअश्विनावावाहयामिनमइतिप्रणवादिनमोंतैस्थापयेत् मंत्रास्त्वापस्तंबानामष्टकावा
क्यानीतिप्रसिद्धाः नामानितु अश्विनौ यमः अग्निः प्रजापतिः सोमः रुद्रः अदितिः ७२
बृहस्पतिः सर्पाः पितरः भगः अर्यमा सविता त्वष्टा वायुः इंद्राग्नी मित्रः इंद्रः निर्ऋतिः

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(१८)

आपः विश्वेदेवाः विष्णुः वसवः वरुणः अजैकपात् अहिर्बुध्न्यः पूषा एवं देवतात्रयमावाह्यै
भिर्मंत्रैः कांडानुसमयेन षोडशोपचारैः पूजयेत् तत्र चंद्रग्रहे चंद्राय श्वेतानि वस्त्रगंधाक्षतमा
ल्यानि देयानि सूर्यग्रहे तु सूर्याय रक्तवस्त्ररक्तचंदनरक्ताक्षतकरवीरपुष्पाणि देयानि राहवे
कृष्णानि नक्षत्रदेवताभ्यः श्वेतानि ततः पश्चिमतोग्निं प्रतिष्ठाप्य पक्षे नवग्रहानप्यावाह्य
पूर्वं संपूज्यान्वाधानं कुर्यात् तथा इसमिधेत्यहं तान्वक्षुषी आज्येनेत्यंतमुक्त्वा पक्षे पूर्ववन्
नवग्रहानुद्दिश्याष्टशताष्टाविंशत्यष्टान्यतमसंख्यामुद्दिश्य चंद्रममुकसंख्याभिः पलाश
समिदाज्यचरुतिलाहुतिभिः राहुं अमुकसंख्याभिः दूर्वाज्यचरुतिलाहुतिभिर्नक्षत्रदेवता
ममुकसंख्या पलाशसमिदाज्यचरुतिलाहुतिभिर्यक्ष्ये शेषेणेत्याद्युक्त्वा जुहुयात् सूर्यग्र
हे चंद्रस्थाने सूर्यममुकसंख्याऽर्कसमिदाज्यचरुतिलाहुतिभिरि[illegible]देत् एवमन्वाधाय

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(101)



प्रणीताप्रणयनांतंकृत्वा त्रिभ्योमुष्मैत्वेतिचतुरश्चतुरोमुष्टीन्निरूप्यचरुंश्रपयित्वाज्यभा
गांतंकुर्यात्‌ ततोयजमानोदक्षिणतोदेवताउद्दिश्यत्यजेत्‌ ततोन्वाधानक्रमेणजुहुयुः
ततस्तिसृणांदूर्वाणामेकाहुतिःसमिधश्चाग्निमध्यकाकार्याः ततःस्विष्टकृतादिपूर्णाहुत्यं
तंप्राग्वत्‌ ततआचार्यएकस्मिन्कलशेजलपूर्णेपंचकव्यानिपंचरत्नानिवटाश्वत्थोदुंब
राम्रबिल्वानांत्वचःपंचपल्लवान्ससर्वौषधिकल्कंदूर्वाःकुशांश्चनिक्षिप्यसचरुत्विक्दंप
तीपूर्ववदभिषिंचेदेतैर्मंत्रैः आपोहिष्ठेतिनवर्चस्य० अन्येपिसमुद्रज्येष्ठाइत्यादयः सुरा
स्त्वामित्यादयःपौराणोक्ताश्च ततःस्नानंदक्षिणादानंप्रतिमाप्रतिपादनादिपूर्ववत्‌ य
दातुपूर्वशांतिसमुच्चयस्तदाकालैक्यात्कर्मैक्याच्चाग्नेयादिवतंत्रप्रयोगाः तत्रयजमानो ७४
देशकालौस्मृत्वाममास्याःपत्न्याःप्रथमरजोदर्शनेऽमुकमासतिथ्यादिअमुकग्रहण्यास्र

(10A)

चितेत्यादिसंकल्प्य ऋत्विक्पूजांतंविदध्यात् ततःआचार्योभुवनेश्वरींपूजांतःप्राक्पश्चा
द्वाततउदीच्यांचंद्रादीन्संपूज्ययथोपक्रमंनिर्वापहोमाभिषेकान्कुर्यादितिविशेषः अन्य
त्सर्वंसमानं इतिग्रहणेरजोदर्शनशांतिः इतिश्रीमद्विद्वन्मुकुटमाणिक्यश्रीमद्रामेश्वर
भट्टसुतनारायणभट्टविरचितेप्रयोगरत्नेआत्मज्येष्ठसुतरामकृष्णोन्नीतादुष्टरजोदर्शन
शांतिःसमाप्ता अथगर्भाधानाख्यंगर्भाधानं रजोदर्शनात्षोडशाहोरात्राणिऋतुस्त
न्मध्येआद्यरात्रिचतुष्कंपर्वादिनिषिद्धदिनानिचवर्जयित्वा मघामूलादिव्यतिव्यतिरि
क्तेदैवज्ञोक्तेशुभकालेदंपत्योश्चंद्रानुकूल्येगर्भाधानंकार्यं तत्रापियुग्मासुरात्रिषुपुत्राः
अयुग्मासुकन्याजायंतइत्यादिज्ञेयं तत्रायंक्रमः कर्ताप्रातरभ्यंगस्नानंकृत्वापत्नीम
पिनवोदकुंभसलिलैःसप्तमृत्तिकापंचपल्लवपंचत्वक्सहितैःस्नापयित्वातयासहा

## मूळ प्रत पाहण्यासाठी संपर्क


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com